योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३७

सप्तत्रिंशः सर्गः ३७

श्रीवसिष्ठ उवाच ।

रणे रभसनिर्लूननरवारणदारुणे ।

अहंपूर्वमहंपूर्वमिति वृन्दानुपातिनि ।। १

एते चान्ये च बहवस्तत्र भस्मत्वमागताः ।

प्रविशन्तः प्रयत्नेन शलभा इव पावके ।। २

अत्रान्ये मध्यदेशीया जना नोदाहृता मया ।

तानिमाञ्छृणु वक्ष्यामि पक्षाँल्लीलामहीभृतः ।। ३

तद्देहिकाः शूरसेना गुडा अश्वघनायकाः ।

उत्तमज्योतिभद्राणि मदमध्यमिकादयः ।। ४

सालूकाकोद्यमालास्या दौज्ञेयाः पिप्पलायनाः ।

माण्डव्याः पाण्डुनगराः सौग्रीवाद्या गुरुग्रहाः ।। ५

पारियात्राः कुराष्ट्राश्च यामुनोदुम्बरा अपि ।

राज्याह्वा उज्जिहानाश्च कालकोटिकमाथुराः ।। ६

पाञ्चाला धर्मारण्याश्च तथैवोत्तरदक्षिणाः ।

पाञ्चालकाः कुरुक्षेत्रास्तथा सारस्वता जनाः ।। ७

अवन्तीस्यन्दनश्रेणीकुन्तिपाञ्चनदेरितैः ।

स्पन्दमाना विद्रवन्ती निपपात महाभृगौ ।। ८

कोशब्रह्मावसानाश्च च्छिन्ना वस्त्रवतीजनैः ।

भूमौ निपतिताः सन्तो मिलिता मत्तवारणैः ।। ९

शूरा दाशपुराः शस्त्रनिकृत्तोदरकन्धराः ।

बाणक्षितिभिराक्रम्य योजिता योजने ह्रदे ।। १०

दीर्णोदरविनिर्यातस्वान्त्रतन्त्रीनियन्त्रिताः ।

शान्तिकाःशान्तसंचाराः पिशाच्चैश्चर्विता निशि ।। ११

उद्रवैर्भद्रगिरिभिः संग्रामाध्वरदीक्षितैः ।

क्षोणिगर्तेषु निक्षिप्ता मरगाः कमठा इव ।। १२

प्रद्रुता विद्रवद्रक्ता विद्रावितमहारयः ।

दण्डिकास्थानिलोद्धूता हैहयैर्हरिणा इव ।। १३

दन्तिदन्तविनिर्भिन्ना दरदा दलितारयः ।

नीता रक्तमहानद्या द्रुमाणां पल्लवा इव ।। १४

नाराचैश्चर्विताश्चीना जीर्णा जर्जरजीविताः ।

जहुर्जलनिधौ देहान्भारभूतानिव स्थितान् ।। १५

कर्णाटसुभटोड्डीनकुन्ताकलितकन्धराः ।

भग्ना नलदशूराश्च तारकानिकरा इव ।। १६

करीन्द्रमकरव्यूहरंहःसंहतहेतयः ।

केशाकेशिकृतारम्भा विनेदुर्दाशकाः शकाः ।। १७

दशार्णाः पाशनिर्मुक्तश्रृङ्खला जालभीरवः ।

निलीना रक्तजम्बाले वैतसास्तिमयो यथा ।। १८

गुर्जरानीकनाशेन गुर्जरीकेशलुञ्चनम् ।

विहितं तङ्गणोत्तुङ्गनासिशङ्कुशतै रणे ।। १९

सिषिचुः शस्त्रकर्णौघाद्विन्दुभ्यो निगडा गुहान् ।

शरधारावनानीव वीरहेतिप्रभाम्बुदाः ।। २०

भुशुण्डीमण्डलोद्द्योतश्यामार्कोत्पातभीरुषु ।

आभीरेष्वरयः पेतुर्गोगणा हरितेष्विव ।। २१

कान्तकाञ्चनकान्तासीत्ताम्रसंग्रामवाहिनी ।

भुक्ता गौडभटेनाङ्ग नखकेशनिकर्षणैः ।। २२

रणे नगनयासंख्यकवच्चक्रनिकृन्तनैः ।

तङ्गणाः कणशः कीर्णाः कङ्कगृध्रेषुभासकैः ।। २३

लगुडालोडनोड्डीनं गौडं गुडुगुडारवम् ।

श्रुत्वा गान्धारगावोऽग्रे दुद्रुवुर्द्रविडा इव ।। २४

आकाशगार्णवप्रख्यो वहच्छकककदम्बकः ।

अकरोत्पारसीकानां घननैशतमोभ्रमम् ।। २५

मन्दराहननोड्डीनस्वच्छक्षीरार्णवोदरे ।

वनानीवायुधान्यासञ्छत्रप्रालेयसानुनि ।। २६

यदम्बुदैरिवोड्डीनं शस्त्रवृन्दैर्नभोङ्गणे ।

तद्दृष्टं वीचिवलनैर्लोलैः प्लुतमिवार्णवे ।। २७

शतचन्द्रं सितच्छत्रैः शरैः शलभनिर्भरम् ।

शक्तिभिः किल नीरन्ध्रं दृष्टमाकाशकाननम् ।। २८

वीरासवसमाक्रन्दकारिणः केकयैः कृताः ।

कङ्कैः कङ्ककुलाक्रान्तव्योमोद्धूलितमस्तकाः ।। २९

किरातसैन्यकन्यानां कामं कलकलारवैः ।

अङ्गैरनङ्गतां नीत्वा भैरवैरिव गर्जितम् ।। ३०

काशैस्तद्देहकाः क्रांता अदृश्यैर्मायया खगैः ।

निर्धूतपक्षैः क्षुभितैः पवनैरिव पांसवः ।। ३१

उन्मत्ताः सुविनिर्धूतास्त्यक्तहेतिरणाम्बराः ।

नार्मदा नर्मनिर्मातृ ननृतुर्जहसुर्जगुः ।। ३२

प्रक्वणत्किंकिणीजालं शक्तिवर्षमुपागतम् ।

साल्वबाणानिलोद्धूतमगमत्पृषदाकृति ।। ३३

शैव्यास्तु खण्डिताः कौन्तैर्भ्रमत्कुन्तैर्विघट्टिताः ।

शवीभूता दिवं नीता दृष्टा विद्याधरा इव ।। ३४

धराधरणधर्मिण्या धीरया हीनसेनया ।

लुण्ठिताः पाण्डुनगराश्चलनोल्लासमात्रतः ।। ३५

त देहकाः पाञ्चनदैर्दलिता मत्तकाशिभिः ।

कुन्तदन्तद्रुमोद्दामा नगा इव मतङ्गजैः ।। ३६

ब्रह्मावत्सनका नीपैश्चक्रैः कृत्ता गता महीम् ।
सहयाः क्रकचोन्कृत्ता वृक्षाः कुसुमिता इव ।। ३७
श्वेतकाकाननं लूनं कुठारैर्जठरेरितैः ।
एतद्ददाह पार्श्वस्थो भद्रेशः शरवह्निना ।। ३८
काष्ठयोधे निरालानं मग्ना जीर्णा मतङ्गजाः ।
लयमाजग्मुरायुद्धमिद्धेग्नाविन्धनं यथा ।। ३९
मित्रगर्तास्त्रिगर्तात्ता भ्रमित्वोर्ध्वं तृणोपमम् ।
विविशुर्व्यस्तमूर्धानः पातालान्तं पलायितुम् ।। ४०
मन्दानिलचलाम्भोधिभासुरे मागधे बले ।
निर्मग्ना वनिला मन्दाः पङ्के जीर्णगजा इव ।। ४१
चेदयश्चेतनां जह्रुस्तङ्गणानां रणाङ्गणे ।
पुष्पाणां पथि शीर्णानां सौकुमार्यमिवातपाः ।। ४२
कौसलाः पौरवारावमसहन्तोऽन्तका इव ।
तैरुन्मुक्तगदाप्रासशरशक्त्यतिवृष्टयः ।। ४३
बभूवुर्भल्लकृत्ताङ्गाऽविस्मया विद्रुमद्रुमाः ।
इवाद्रौ विद्रवन्त्यार्द्रसान्द्रासृक्सूर्यमूर्तयः ।। ४४
नाराचौघमहाहेतिमारुताधूतमूर्तयः ।
बभ्रमुर्भ्रमरानीकभासुरा जलदा इव ।। ४५
शरधाराधरा मेघाः शरोर्णापूर्णमेषकाः ।
शरपत्रावृता वृक्षा भ्रमुस्तद्गर्जनागजाः ।। ४६
वनराज्यजराजीर्णाः कन्दाकस्थलजन्तवः ।
अत्रुटन्परमाकृष्टाः पेलवा इव तन्तवः ।। ४७
रथेषु ध्वस्तचक्रेषु निखातेऽमुत्र मूर्धसु ।
निपेतुर्जनसंघाता मेघा इव वनाद्रिषु ।। ४८
शालतालवनं प्राप्य जनतावलनं वनम् ।
भुजावकर्तनं चासीदुत्तालं स्थाणुकाननम् ।। ४९

ननर्दुर्नन्दनोद्यानसुन्दर्यो मत्तयौवनाः ।

वनोपवनदेशेषु मेरोर्वीरवराश्रिताः ।। ५०

तावत्तारारवं रेजे सैन्यकाननमुत्तमम् ।

यावन्न परपक्षेण प्राप्तं कल्पानलार्चिषा ।। ५१

छिन्नाः पिशाचसंयुक्ता भूतापहृतहेतयः ।

पातयित्वा ययुः कर्णान्दशार्णास्तर्णका इव ।। ५२

जहुर्भग्नेश्वराः कान्ति तां जिगीषवनौजसा ।

कासयः कमलानीव शुष्कस्रोतस्विनौजसा ।। ५३

तुषाका मेसलैः कीर्णाः शरशक्त्यसिमुद्गरैः ।

विद्रुता नरकैः क्षिप्ताः कटकच्छलना अपि ।। ५४

कौन्तक्षेत्राः प्रस्थवासैः स्थित्वा योधिभिरावृताः ।

गुणा इव खलाक्रान्ता गता व्यक्तमशक्तताम् ।। ५५

द्विपयो बाहुधानानां क्षणेनादाय मस्तकम्।

भल्लैः पलाय्याशु गता विलूनकमला इव ।। ५६

मिथः सारस्वता नीत्वा आदिनान्तं कृताजयः ।

पण्डिता इव वादेषु नोद्विग्ना न पराजिताः ।। ५७

खर्वगाः खदिताः क्षुद्रा यातुधानैः परावृताः ।

तेजः परममाजग्मुः शान्ताग्नय इवेन्धनैः ।। ५८

कियदाख्यायत एत-

ज्जिह्वानिचयैः किलालमाकुलितः ।

वासुकिरपि वर्णयितुं

न समर्थो रणवरं राम ।। ५९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे मो०

लीलो० जनपदवर्णनं नाम सप्तत्रिंशः सर्गः ।।३७।।